*Reviews of Books*

PAGE

IX. Māyāvāda or the Non-Dualistic Philosophy (Vedānta) (153 18 pp.) (*b*) Critical Examination of the Philosophy of Religion in 2 volumes by Sadhu Santinath, published by the Oriental Book Agency, Poona *By Dr. D. M. Dutta, M.A., P.R.S., Ph.D., Patna College* .. .. .. .. .. 231

*Notes of the Quarter*

I. Manuscripts acquired by the Society in 1938-39 .. .. .. .. .. 234

II. List of Members of the Bihar and Orissa Research Society on the 31st December, 1938 .. .. .. .. .. .. 236

III. Transliteration pages .. .. .. .. 244

*Appendix*

I. Pramāṇavārttikavṛtti, Edited *By the Rev. Rāhula Sāṅkṛtyāyana* .. .. .. 57

JOURNAL OF THE BIHAR AND ORISSA RESEARCH SOCIETY

VOL. XXIV ] 1938 [ PART IV

## Leading Articles

# SEARCH FOR SANSKRIT MSS. IN TIBET

*By Rev. Rāhula Sāṅkṛtyāyana*

This was my fourth journey to Tibet. We left Kalimpong on the 4th May, 1938. At the beginning our party consisted of three members *viz.*—the Tibetan Scholar Geshe Gendun Chhomphel, the photo-artist Mr. Fany Mockerjee and myself. Afterwards our number was increased to five when Pandit Abhay Singh Parera and Mr. Kanwal Krishna, an assistant to Mr. Mockerjee joined our party. This time we were fortunate enough to get the whole-hearted support from the Tibetan Government through the help of Reding-Chhang, the young regent, who has great love for Tibetan learning and its art. We were provided not only with three ponies and three pack-animals free of charge for our conveyance, but we were also given special letters of introduction to the local Government officials and the

heads of the monasteries where the precious manuscripts are kept. The Tibetan Government was ready to extend the field of our research to the country surrounding Lhasa and Samye where there was some possibility of finding new Sanskrit palm-leaf manuscripts, but unfortunately, all our time was spent in taking photographs of the MSS. in the monasteries of Ṣhalu, Pökhang, Ngor and Śa-skya, and the winter was close. So we could not avail of the generous offer.

We were also helped by the Political Officer of Sikkim—Mr. Gould and the British Trade Agent Mr. Richardson. Both the gentlemen were ever ready to give useful advice and needful facilities for the work of our party.

We reached Ṣhalu on the 27th May. Our old friend Risur Lama was present, and so it was not difficult to begin our work without delay. In my last journey, though I searched this monastery twice, the search was not thorough. So I wanted to make a fresh attempt in order to discover some new MSS. Our trouble was rewarded by the fresh discovery of a complete set of the twelve works on Buddhist Logic by the great logician Jñāna Śrī and two chapters of *Yôgāchārabhūmi* viz., *Śrāvakabhūmi* and *Pratyekabuddhabhūmi.* Besides these two important volumes, I found six more volumes which are mentioned in my catalogue here. It took more than a fortnight to finish the work at Ṣhalu. Last time we took Photographs of some of these MSS., but we had failed to get good result. This time we were very particular about this matter, since failure of even



one leaf was enough to spoil the utility of the whole treatise.

In my second trip to Tibet, I visited the monastery of Pökhang where I saw three bundles of Sanskrit MSS. in which I noticed an important work by the great poet Aśvaghôṣa. My visit was so brief that I could not go through the whole work. Last time, I tried my best to visit Pökhang, but I could not go. This time I reached Pökhang on the 27th June. When the three volumes were brought, I found that one was *Tridaṇḍamālā* by Aśvaghôsha with a separate work named *Parikathā* by a later author. They are not poetical works, but their importance is great, since they deal with the art of eloquence. In fact, they are practical lessons to the students of those days who wanted to become good speakers. The first work by Aśvaghôṣa is rather more primitive, but the later work is far advanced, which shows that since the time of Aśvaghôṣa (1st century A.C.) up to the 8th century when probably this second work was composed the art of public speech was greatly developed. The monastery of Pökhang was established sometime towards the end of the 13th century when the Indian teacher Vajrapāṇi or Gyagar Chhagna as he is known to the Tibetan, visited Tibet. The monastery has got some important relics among which we may specially mention the Chīvaras (monk's garb), alms-bowl, a pair of shoes, all belonging to Śākyaśrībhadra, the last hierarch of the Buddhist church in India and the Head of the Vikramaśilā monastery, who went to Tibet in 1203 after the destruction of the Buddhist institutions in India. The monastery has got about

one hundred and five paintings in so-called Tibetan banners which were executed by a famous artist of the time (Stag-rtse-mkhas-pa) Rab-bratan-Kun-bsang under the patronage of king Kun-dzang-rabtan of the 15th century. There is also one small plaster-cast statue of Śākyaśrī which was moulded by (Dbus-kyi--rgya-ma-rin-chen-rgang Rza-mkhan) Bkra-sis-ḥod-ḥvar possibly during the life-time of the Indian teacher.

After staying for a few weeks at Shigartse we went to Ngor on the 31st July. The monastery of Ngor is one of the three monasteries in Tibet which have got the largest collection of Sanskrit MSS. In subject-matter the collection of this monastery is more important. We did not give previous information of our arrival. We feared that the chief custodian may play a trick by absenting himself as his predecessors did last time. During the months of June, July and August the climate is agreeable since cold is not intense, but at the same time, the rain which is rare and the clouds which are always there in the sky obstruct the work of taking photographs. It took sixteen days to finish our work.

Narthang is not very far from the monastery of Ngor. Though there was no possibility of finding any Sanskrit MS. in this ancient monastery which is famous for its wooden block-prints of Kanjur and Tanjur, it has got some very old paintings which were imported to Tibet from Nepal or were executed under the direction of Indian or Nepali master-artists. The work seems to belong to the 13th century.

From Narthang we proceeded to Sākya where



we reached on the 1st September. We were welcomed by the present Śākya-hierarch, the Lama of Phunchhog palace, our old friend and patron who greatly helped me in my previous journey. We went to Chhag-pe-lha-Khang, the Manuscript-library, to make a further search for fresh MSS. This time we made a more thorough search, but we could not get any new MS. We took the photographs of some important MSS. which I discovered in my previous journey. We could not finish our work before the 15th September. The temperature was going down and there was the less possibility of continuing our work in Tibet, but we had great desire to visit some of the important monasteries in the vicinity of Lhāsā and Samye, since I knew that it was a rare opportunity for our search in which we had the full cooperation and help of the Tibetan Government. We were still undecided when we left śākya, but after crossing the second pass of Dobta, we met a band of robbers who were camping not very far from the route. Fortunately, at first they did not notice the importance of our caravan. We halted in the next village. We did not know that there was any danger ahead. We met a few donkey-men who were coming from the opposite direction. They informed that about a dozen of robbers were encamping on the road two miles ahead. Our pack-animals left us hours before. We thought that our animals were going to fall in their hands. We hurried. The robbers had no clear idea about our party. They put a few simple questions to us, but did not try to harm us. Afterwards we were informed by our

men that the robbers enquired about us and they were told that the things belonged to the hierarch of Śākya who was coming behind. Thus both we and our things were saved. We reached the next village, and when the pack-animals were returning to their home, our men saw the same robbers encamping on the other bank of a river about a mile from the village in which we were staying. Fearing that they might not be robbed of their animals, they came back in the village. We learnt that it was the same band of robbers whom we met the previous day. Now they had full information about our identity and of our numeral and armed strength. So they were earnest in their pursuit. All night not only ourselves, but the whole village was in fear of their attack. The dogs were unchained, and we were ready with our revolvers. Nothing, however, happened. The same night we decided to reach the Indian Frontier as soon as possible, since the road before us was more wild with scanty human habitation. We entered Tibet on the 9th May and left for India on the 25th September. Thus we spent in Tibet about four and a half months in which we took about fourteen hundred photographs of Sanskrit MSS. and important objects of art.



IX Ṣhalu Monastery (continued from Vol. XXI, Part I, pp 8–10 and Vol. XXIII, Part I, pp 33–52)

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| XXXIX | 1 | 337 | क्षणभंगाध्याय[1] | (ज्ञान श्रीमित्र) | मागधी | 22″×2″ | 62 | 7 | complete |
| | 2 | 338 | व्याप्तिचर्चा[2] | " | " | " | 9 | " | " |
| | 3 | 339 | भेदाभेदपरीक्षा[3] | (") | " | " | 1–2 | " | " |
| | 4 | 340 | अनुपलब्धिरहस्य[4] | (") | " | " | 2–6/2 | " | " |
| | 5 | 341 | सर्वशब्दाभावचर्चा | (") | " | " | 6/2–8 | " | " |
| | 6 | 342 | अपोहप्रकरण[5] | (") | " | " | 8–20 | " | " |
| | 7 | 343 | ईश्वरदूषण[6] | (") | " | " | 20–33 | " | " |
| | 8 | 344 | ईश्वरवादाधिकारव्याख्या[7] | (") | " | " | 33–54 | " | " |

[1] see also Ṣhalu Vol. XIII. 3 In the colophon ग्रन्थसंख्या ६४०.

[2] In the colophon "कृतिरियं महापडिण्तज्ञानश्रीमित्रपादानाम्।"

[3] Begins "प्रत्येकपक्षोपनिपातिदूषणपरिजिहीर्षया कैश्चिदाश्रीयमाणो भेदाभेदपक्षः परीक्ष्यते।"

[4] Begins—"सिद्धान्ते विप्रकीर्णस्यानुपलम्भस्य यादृशी। रूपनिष्ठेह तादृश्याः संग्रहः क्रियते स्फुटः"

[5] Begins—"अपोहः शब्दलिङ्गाभ्यां प्रकाश्यत इति स्थितिः। साध्यते सर्वधर्माणामवाच्यत्वप्रसिद्धये॥"

[6] Begins—"कर्मनिर्मितवैचित्र्यमनीशं यो जगज्जगौ। प्रणमामि प्रमाणेन तमव्याहतशासनं॥"

[7] Ends—"ईश्वरवादाधिकारे वार्त्तिकसप्तश्लोकीव्याख्यानं समाप्तं।" which shows that it is a commentary

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| | 9 | 345 | कार्यकारणभावसिद्धि (ज्ञान श्रीमित्र) | मागधी | 22″×2″ | 54–56 | 7 | complete |
| | 10 | 346 | योगिनिर्णय (″) | ″ | ″ | 56–65 | ″ | ″ |
| | 11 | 347 | अद्वैतविन्दुप्रकरण (″) | ″ | ″ | 65–72 | ″ | ″ |
| | 12 | 348 | साकारसिद्धि[1] ″ | ″ | ″ | 72–122 | ″ | ″ |
| | 13 | 349 | साकारसंग्रहसूत्र[2] ″ | ″ | ″ | 122–37 | ″ | ″ |
| XL | 1 | 350 | (श्रावक भूमि[3])[4] (असंग) | कुटिला | $20\frac{1}{2}$″×$2\frac{1}{8}$″ | 126 | 7, 8 | Incomplete |

on the प्रमाणवार्त्तिक ch. II, 8–14

[1] Begins—"विधूतकल्पना जाल० (see प्रमाणवार्त्तिक ch. I, 1)। जीयान्मुनीन्द्रमतवार्त्तिकभाष्यकारः साकारसिद्धि-नयनाटकसूत्रधारः। संसारनिर्वृतिपथप्रथमानगर्व्वसर्वारिवीरदुरतिक्रमविक्रमश्रीः॥ विज्ञप्तिमात्रमखिलं स्थितमेतज्जगत् त्रयं। तत्रा-वान्तरभेदस्य बलाबलमिहोच्यते॥" In the end—"समाप्तञ्चेदं बलाबलपरीक्षामुखशारत्वं (?) साकारसिद्धिशास्त्रं कृतिर्महापण्डित श्रीज्ञानश्रीमित्रपादानामिति॥"

[2] Begins—"प्रज्ञा येन खलीकृताऽम्वरदशामाकृष्य नः प्रेयसी सासूयं सदसि स्थितेषु कृतिषु प्रख्यातकीर्तिष्वपि। क्रूरन्यायमयो निराकृतिनयो दुःशासनः सांप्रतं सोयं मद्भुजपञ्जरे निपतितः संरक्षतां कौरवाः॥" In the end—"ग्रन्थप्रमाणं ७६६।"

[3] Leaves 1 and 128 missing. There are two Bhūmis—श्रावकभूमि and प्रत्येकबुद्धभूमिः. On the page 15b—"श्रावक-भूमावावतारभूमिः समाप्ता ॥०॥ नैष्कम्यभूमिः कतमा।" p. 66a—"योगाचारभूमौ श्रावकभूमिसंगृहीतायां प्रथमयोगस्थानम्॥" "लौकिकं चैव वैराग्यं तथा लोकोत्तरेण च। तयोश्चैव हि संभारो भूमिर्नैष्क्रम्य संज्ञितम्।" p. 129a—"श्रावकभूमौ चतुर्थयोगस्थानं। समाप्ता श्रावकभूमिः॥ प्रत्येकबुद्धभूमिः कतमा (।) सा पञ्चाकारा" p 129b—"समाप्ता च प्रत्येकबुद्धभूमिः।"

[4] A chapter of योगाचारभूमि।



| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| | 2 | 351 | आभिप्रायिक गाथानिर्देश | कुटिला | $20\frac{1}{2}$″×$2\frac{1}{8}$″ | 4 | 7, 9 | Incomplete |
| XLI | | 352 | बोधिसत्त्वभूमि[1] असंग | ″ | 12×2 | 226 | 7 | Complete |
| XLII | | 353 | कातंत्रपंजिका त्रिलोचनदास | मागधी | 12×$2\frac{1}{4}$ | 57 | 7 | Incomplete |
| XLIII | 1 | 354 | अद्वयसमताकल्पराज[2] | कुटिला | 21×2 | 22 | 7 | ″ |
| | 2 | 355 | चतुर्योगिनीसंपुटतंत्रराज | ″ | ″ | 6 | 6 | Complete |
| | 3 | 356 | वज्रडाकतंत्रटीका[3] | ″ | ″ | 24 | 7 | Incomplete |
| XLIV | | 357 | बलितत्त्व रत्नशील | मागधी | 22×$1\frac{3}{4}$ | 16 | 5 | Complete |
| XLV | 1 | 358 | पंचक्रमटिप्पणी*[4] मुनिश्रीभद्र | कुटिला | 13×2 | 50 | 5 | ″ |
| | 2 | 359 | वज्रसत्त्व साधन*[5] लीलावज्र | ″ | $13\frac{1}{2}$×2 | 4 | 7 | ″ |
| | 3 | 360 | योगरत्नमालाटिप्पणी[6] बन्धुकीर्ति | मागधी | $12\frac{1}{2}$×2 | 22 | 3 | Incomplete |
| | 4 | | Leaves* | कुटिला | $13\frac{1}{2}$×2 | 5 | 5 | ″ |

[1] A chapter of योगाचारभूमि।

[2] Only first leaf missing.

[3] Leaves 9 and 27 and after are missing. * Paper Mss. [4] For 42 and 43 there is only one leaf. In the colophon—"कृतिरियं मगधदेशीयपण्डितशाक्यभिक्षुमुनिश्रीभद्रस्य।"

[5] In the colophon—"लिखि (तं) विभूतिना यदत्र पुण्यमित्यादि।"

[6] Leaf 8 missing.

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| XLVI | 361 | (Astrology)[1] | मैथिली | 15×1 | 35 | 3 | Incomplete |

---

[1] Name of the book and many leaves missing. A few leaves seem to belong to other Ms. Some of the chapters are—"तृतीयोध्यायः" (8a ?); "देवपुरुषकाराध्यायः पञ्चमः" (3b ?); "वारगुणाध्यायः पञ्चमः" (12b); "यात्रायां लग्ननिश्चयोऽष्टमोध्यायः (16a); "द्रेक्काणाध्यायो नवमः (?); "मिश्रिकाध्यायो दशमः" (?); "ग्रहशुद्धिर्नाम दशमोध्यायः" (18a); "उत्सवाद्यध्याय एकादशमः (22a); "स्वप्नाध्याय पञ्चदशमः" (29a); "स्नानविधिः षोडशोध्यायः" (30b); "ग्रहचक्राध्यायः सप्तदशमः" (32a); "निर्गमाध्यायोऽष्टादशः" (32b); "एकोनविंशाध्यायो हस्तीङ्गितं" (34b); "अश्वेङ्गितं विंशतितमोध्यायः" (36b); "निमित्ताध्यायो एकविंशतिमः" An example of the verses—"यथो (?च्चो)क्तं राश्युदये द्वादशभागेपि तत् फलम्वाच्यं। यच्च नवांशकविहितं त्रिंशांशस्योदये तत् स्यात् ॥" (द्रेक्काणाध्याये)



## SPOS-KHANG MONASTERY[1]

| Vol. | No. | Name | Author | Script | Size (in inches) | Leaves | Lines in each page | |
|---|---|---|---|---|---|---|---|---|
| I 1 | 4 | (सूत्र-धारणीसंग्रह)[2] | " | रंजन (ordinary) | $21\times1\frac{3}{4}$ | 100 | 5 | incomplete |

---

[1] Some correction and addition to "Sanskrit Palm-leaf Mss. in Tibet" JBORS. Vol. XXI, Part I, Page 8.

[2] Very old Ms. Names of some of the Sūtras and Dhāraṇīs are—"चूडामणी नामम(हा)विद्या", "संक्षिप्ता प्रज्ञापारमिता", "आर्यध्वजाग्रकेयूरा नाम धारणी", "आर्यचन्दनाङ्ग नाम धारणी", "पुष्प-कूटा(?)॰ (p. 130b)" "मारीची महाविद्या (p. 131a)", "मूलापराजिता महाविद्या (p. 133a)", "आर्यापराजिता हृदयं (p. 133b)", Here begins some new Sūtra or Dhāraṇī—"एवम्मया श्रुतमेकास्मिन् समये भगवान् पारावते विषये सिञ्च (?) नाम नगरं गोमिनो नाम विहारः नागमो वर्षः मार्गशीर्षमासे कृष्णपक्षपञ्चम्यां (।) वयख्यानो नाम भिक्षुः गन्सो नाम नगरं चीननगरात् चतुर्भियोंजनैरध्वमार्गप्रतिपन्नो"। "वैशलीप्रवेशं(?) सूत्रं मारीच्युपद्रवोपशमनं समाप्तं ॥" Here (p. 138a) some of the gāthas—"स्वस्ति रात्रौ स्वस्ति दिवा स्वस्ति मध्यन्दिने स्थिते। सर्वत्र स्वस्ति वो भवतु मा कश्चित् पापमागमत् ॥ सर्वे सत्वाः सर्वे प्राणाः सर्वे भूताश्च केवलाः। सर्वे वै सुखिनः सन्तु सर्वे सन्तु निरामया(:) ॥ सर्वदुःखविमुक्तात्मात्मा सर्वसौख्यसमन्विताः। सर्वे भद्राणि पश्यन्तु माकश्चित् पापमागमत्। यानीह भूतानि समागतानि स्थितानि भूमावथवान्तरीक्षे। कुर्वन्तुमैत्री(') सततं प्रजासु दिवा च रात्रौ (च) चरन्तु धर्मं" एवम्भदन्तेत्यायुष्मानानन्दो भगवतः प्रतिश्रुत्य इन्द्रकीले पादं स्थापयित्वा विस्तरेण यावदिमानि मन्त्रपदानि भाषते इमाश्च गाथाः" "सर्वान्तरायविसोधनं नाम महायानसूत्रं", "आर्यमहाप्रतिसरा द्वितीयमन्त्रपदानि समाप्तानि (p. 141a)" "राहुलमहादण्डधारणी (p. 146b)" "विशेषवती नामधारणी

| | | | | | | |
|---|---|---|---|---|---|---|
| 2 | 5 (व्याकरण)[1] | " | मागधी | 22×2 | 26 | 4–6 Incomplete |

(p. 135a)" "अपराजिताहृदयं (p. 135b)" "अग्रप्रदीपो नाम महायानसूत्रं (p. 151a)" "आर्यमहाधारणी (p. 152b)" "रत्नमालापराजिता समाप्ता", "आर्य तथागतोष्णीषसितातपत्रा नामापराजिता प्रत्यङ्गिरा समाप्ता (p. 156a)" "सर्वतथागताधिष्ठान हृदयगुह्यधातुकरण्डक मुद्रानामधारणी धर्मपर्यायः (p. 161b)", "आर्यवसुधारा धारणी (p. 163b)" "प्राच्यां राजगृहस्याम्रषण्ड(?) नाम ब्राह्मणग्रामस्तस्योत्तरतो वैदेहके पर्वते इन्द्रशैलगुहायां (p. 164b)", "समन्तमुखप्रथमरश्मिविमलोष्णीषप्रभासं सर्वतथागत-हृदयसमयविलोकितं नाम धारणीपदं (p. 171b)", "आर्यवज्राजितानलप्रमोहनी नाम धारणी (p. 178a)", "आर्यहिरण्यवती नाम धारणी (p. 179b)", "कोटिधारणी (p. 179b)", "आर्यषड्मुखी नाम धारणी", "आर्यमा(?म)णिभद्रधारणी", "चतुर्धर्मकन्नाम महायानसूत्रं",

[1] It is commentary (न्यास ?) on some grammatical work—"(उ)पाध्यायश्चेदागच्छत्यथ त्वं छन्दोधीष्व। उपाध्यायश्चेदागमिष्यत्यथ त्वं व्याकरणमधीष्व। उपाध्यायश्चेदागन्ताऽथ त्वं निरुक्तमधीष्वेति। भविष्यदुपाध्यायागव(?म)न मध्य न विषय(?)प्रैषस्य विध्याद्यर्थस्य निमित्तं। एव(') पूर्वमौहूर्त्तिके मुहूर्त्तादूर्ध्वमुहूर्त्तस्तत्रभवः काल ऊर्ध्वमौहूर्त्तिकः क्रीतादित्वादि कण्। उत्तर पर वृद्धिः...। ऊर्ध्वमुहूर्त्तादुपाध्यायश्चेदागच्छति। आगमिष्यति। आगन्ता वा। अथ त्वं छन्दोधीष्वेति। ऊर्ध्वमुहूर्त्तादुपाध्यायश्चेदागच्छेदथ त्वं छन्दोधीष्वेति। प्रार्थने विध्यादिलक्षणा सप्तम्यस्त्येवासंश (?शंस) नस्यापि प्रार्थनरूपत्वात्। यद्येवमूर्ध्वमुहूर्त्तादन्यत्रापि सप्तमी स्यादिति चेत् स्यादेव प्रार्थनसप्तम्या निषेधेद्धु...त्वाद्यथा...॥०॥ यश्च॥ एवं कुरु(।) डुकृञ् (।) तनादेरुः करोतेरिति गुणः। अस्योकारः सार्व्वधातुके गुणे इत्याकारस्योकारः। उकाराच्चेति टिलोपः। च्छन्दी(?छिन्धी)ति। छिदिर् हि रुधादित्वान्मध्ये न (?) शब्दस्ततो रुधादेर्व्विकरणान्तस्य लोपः।...भ्यां हेद्धिः॥०॥ सम॥ अन्येतु समर्थनायां पञ्चमीं नेच्छान्ति। सर्व्ववर्म्मणस्तु दृष्टा-व्याकरणत्वादिष्टं (?) चेत्याह (।)......॥काले॥ अथ किमर्थं सप्तम्यन्ततानुक्रियते। प्रथमान्त एवानुक्रियतां। सत्यं। प्रथमान्तत्वेन वक्ष्यमाणेषु योगेषु...



| | | | | | | |
|---|---|---|---|---|---|---|
| 3 | 362 (काव्य)[1] | कुटिला | 22×2 | 5 | 6 | " |

त्रिकाले वर्त्तमानेत्यादिषु......(p 15 a) एककर्तृकयोः पूर्वात्॥ एक कर्तृकयोर्व्यापारयोः। यः पूर्वं तदर्थात् क्त्वा भवति। भुक्त्वा व्रजति। द्विवचनस्याड (?)त्वाद् भुक्त्वा पीत्वा व्रजति। परा ये क्रमा (?)वा। एककर्तृकयोरिति किं। भुक्तवति देवदत्ते यज्ञदत्तो व्रजति। पूर्वादिति किं। भुंक्ते च पचति च। अप्राप्य नदी पर्वतः। अतिक्रम्य पर्व्वतन्नदी हि भवतेः। सर्व्वत्र सम्भवात्। (15 b) एककर्तृकता पूर्वकालता च गम्यते॥ आभीक्ष्ण्ये णमुलच्॥...पूर्वाग्रे प्रथमेषु।

[1] Only Leaves 14–18. It begins (14 a 1) "कन्यान्वितत्वाज्जय....नयनं दत्तवान् याचिकायै (।) ग्रन्थस्त-स्याग्रबुद्धेः प्रविसृत य सु(?श) सश्चा यं दे व स्य यो सौः(?)। यत्नात् तं लेखयित्वा यदमलकुशलं व्योम विस्पा(?स्ता)रपूरि भिक्षोर्वैरोचनस्य वि(?)जगति सकले बद्धसन्नाह बोधे चा भूतस्मे (?) तेन सत्वा निखिलकुमतिभिर्मुक्तचित्ता जिनाः स्युः (॥)

भू[1]या सञ्चाहमे......णया प्रज्ञया युक्तचेताः॥ ॥छ॥ नमो बुद्धाय। महान्ति पापान्यभिभूय यस्मादजातशत्रुर्गुणवान् बभूव। उपेत्य सद्भिस्सह संप्रयोगमतो निषेव्या गुणवन्त एव॥

अहो विभूतिर्गुणविस्तराणां गुणाब्धिकर्यत् सह सम्प्रयुज्य। गुणैर[2]भूतैर्व्विगुणोभ्युपेति (गु)णप्रसिद्धिं गुणभूषणेषु॥

अभूतसम्भावनया तया तु हतोप्यसौ कालवशेन भूया:(?यः)। तुषारदग्धद्रुमवद्वसन्ते गुणप्रभावोज्वलतामुपेति॥

स्वभावसंसिद्धिरियन्तथा हि जनस्य सद्वृत्ति(?)निरत्ययस्य। विजिह्मभावेष्वपि यत् प्रयाति गुणप्रसिद्धेः खलु हेतुभावं॥

ब्रवीम्यतो[3]हं नरकोपावासाव...रद्वह्नि शिखाकराले। न चैव सन्मित्रनिराकृतस्य सुरेश्वराङ्का(?)सुखसम्पदोपि।

तद्यथानुश्रूयते (।) राजा किला जा त श त्रुर्व्वनद्विरद वरोपग्रहणनिमित्तं स्वमुखरादभिनिःसृत्य ददर्श महान्तं कुंजरवरं वनाभिमुखमभिद्रवन्तं (।) दृष्ट्वा च पुनस्तमेव हस्तिनं ऽ(?अ)नुजगाम। स च दन्ती॥[4]

स्मृत्वा सरान्सि कमलोत्पलमण्डितानि कादम्बपक्षपवनोद्धतशीकराणि। उद्भिन्न कोमलकशेरुलतावनानि वेगान्महीधरवना-

भिमुखो जगाम।

उत्कण्ठितः किसलयोज्वलपादपानां वैदूर्यनीलहरितोद्गतशाद्वलानां। उद्धूतशीकरकरो द्विरदो वनानां तूर्णं ययौ पवननुन्न-इवांबुग[5]र्भः ॥

अथ स महीपतिः पवनपटुजवातिशयतुरगवराधिरूढो दूरादपसृतबलसहायो न चिरेण खदिरवदरधवविल्वेङ्गुदिकंटकद्रुमवनगहनं शरवणकाशकुशवङ्शजालजटिलदुस्सञ्चारप्रदेशं जीर्णशीर्णविक्षिप्तास्थिकङ्कालसकलधवलभूमिभागां प्रतिभयगम्भी[6] (p. 14b) रपत्रप्रपातस्थलस्थाणुवल्मीकदुर्निर्गमप्रवेशामटवीं प्रपेदे ॥

स च गजाधिपतिस्तस्य राज्ञो दर्शनमुपजगाम॥ राजासौ /विहतपराक्रमावशो ग्रीष्मोष्मक्लमशिथिलाकुलप्रयत्नः । भूरेणुव्यतिकरधूसराग्रकेशस्सम्मोहं समुपजगाम साध्वसेन॥

तस्मिन् खड्गविषाणकोटिकष[1]ण...... सिंहव्याघ्रवराह...... महिषव्याडावकीर्णे वने। एकाकी स नृपोत्र मत्र(?र)वि-करज्वालाप्रतापातुरस्तृष्णार्तः पदवीं ददर्श सहसा शैलेन्द्रसंप्रायिकां॥

ताञ्च मुहूर्त्तमनुगच्छन् ददर्श। दूरादेव नीन(?ल) विपुलस्निग्धपलाशनिचितविटपतरुवरगहनमचलसानुप्रदेशं (।) दृष्ट्वा[2].........यन प्रोवाच॥

अस्मिन्नूनं प्रदेशे नवनलिनि वनच्छन्नतोयं सरो वा(।)धाराशैलोदराद्वा पतति मणिदल स्वच्छशोभाजलस्य।

वक्षास्तत्सन्निकर्षादुपचितविपुलश्यामशाखाप्रशाखा(ः।) येनैते शैलमेतज्जगदिव सकलं सज्जनाच्छोभयन्ति॥ दूरत्वाद[3]..... भारगुरया(?)जीमूतपुंजा इव।

एते वृद्धिमुपागता खलु परामासाद्य तोयाशयं सन्मित्रं समुपेत्य सावव(?)इव प्रध्वस्यमाना रयः॥ तदितो गच्छामीति संप्रधार्योपेत्य च तं प्रदेशं समन्ततो विलोकयन् ददर्शान्यतमस्मिन् तरुवरगहनविवरे[4]......कोपहारातिदर्शने विपुलशिलातलाभोगनिषण्णकृताहार-प्रयोजनमुपशमनिभृतेन्द्रियप्रचारसौम्यवपुषं शाक्यभिक्षुं दृष्ट्वा समाश्वासप्राप्तः प्रह्लादित इव विश्रान्त इव च वाजिनमेकान्ते निबध्य



सप्रश्रयमधुरो[5]...क्तइव च विकचकमलवनरेणुपिंजरसुरभिशिशिरसमीरणेन तं भिक्षुमब्रवीत्। भदन्त सलिलाशयप्रदेशमुपदेष्टुमर्हसीति। तेन चोपदिष्टमथ स राजा तमुपदिष्टं सलिलाशयमुपगम्य विगतपिपासक्लमपरि[6] (15 a)...यूखैः प्रस्वेदवारिकणिकार्द्रललाटभित्तिः। पीत्वापि वारि कमलोत्पलनालशीतं तीव्रक्लमातुरमना न धृतिं जगाम॥

अथ स भिक्षुः सान्द्रकरुणामृतरसार्द्रशीतरेण(?लेन)चक्षुषा तं राजानमभिसमीक्ष्याब्रवीत्। क्लीवसत्वमिव व्या[1]......(प्र)वादो लोकवृत्तातिवृत्तप्रभावेष्वप्युपलक्ष्यते । न खलु सुखोचिताः परदुःखानि जानन्तीति। ननु भदन्तावेषि॥

दग्धापि भू रविकरैः स्फुटदीप्तिमद्भिर्दंदह्यते गतघृणेन दवानलेन। भर्त्तुः प्रवासविरहे वनितेव दुःखैस्त[2]......स्सन्तापिता रविकरैः सुतरां प्रचण्डैः।

कल्याणमित्रविकलास्तु विचारशून्या रागात्मका इव नराः प्रमदाविलासैः॥ धर्मातुरो भयमनागतमप्रधार्यच्छायां समाश्रयति भोगिफणस्य भेकः।

आपातमात्रसुख[3]......मिव राजलक्ष्मीं॥ संशुष्कशालतरुकोटरसन्निलीनो व्यर्थं विरौति परिशुष्कगलः कपोतः।

अज्ञानगह्वरनिरुद्ध इवात्मवादी बालः पुनर्भवतृषाविषमूर्छितात्मा॥ एते गजा रविकरोत्करतापितेषु नैव स्थलेषु न जलेषु धृतिं लभंते।

ग्रा[4]मेषु पुष्पविकचेषु च काननेषु पारिल्ल(?)वाल्पमतयो यतयो यथैव॥ स्यम्वे(?)व पल्वलजलं क्षयमभ्युपैति संशुष्क शैवलरजोरुणपङ्कलेशम् ।

मन्दागमस्य सदसीव विजृम्भमाणम्वाक्कौशलं स्वमति शक्तिनिराकृतस्य॥ एते खगा वनतरून् परिवर्जयन्ति संशीर्णपर्ण-निचयोर्ध्वविशुष्क[5] शाखान्।

विस्मृत्य पूर्वपरिभोगसखान्यनार्या वेश्याविलुप्तधनसारमिवाल्पसत्वं॥ दावाग्नि भस्मपरुषैः पवनैरुदस्तमेतद्भ्रमत्यविरतं तरुपर्णचक्रं।

उत्पीडच्यमानमनिशं निरवग्रहेण संसारचक्रमिव कर्मसमीरणेन ।

पर्यन्तेषु स्फुटितसकलच्छेदसंपर्करूक्षस्तोयाभ्यासे श्रुतजल[6] (15b) तया न द्रवो नातिशुष्कः।

किञ्चिच्छेषा कलुषसलिलाप्लावितो मध्यभागे पङ्कः शोषं स्फुरितशफरीजालगर्भः प्रयाति ॥

किञ्चिच्छेषविवर्णपर्ण्णशवला मूले कठोरारुणा मन्दश्यामपलाशसंचयवती मध्ये समार्द्रच्छवि।

धर्म्मश्यामविभुग्नपल्लवदलाप्रान्ते लता नर्तकी म्ला[1]नि यात्यनिशं कलाविव युगे सत्पौरुषी धर्म्मता॥ छत्रैर्व्यभ्रशशाङ्क-मण्डलसितैरनुप्रभाभास्वरैर्व्विक्षिप्ताः किरणा यदस्य वहुशो निर्याणकाले मम।

तद्दूरं हृदयेन सञ्चिमयं नूनं वहत्यंशुमां (?मान्) यन्मान्निर्दहतीव दुर्जनवचस्तीक्ष्णैर्म्मयूखाङ्कुरैः ॥

अथ सभिक्षुः कथान्तरविवक्षया स्मि[2]तमाविश्चकार॥...पल—स राजा समन्ततो निरीक्ष्य म(?अ)न्यमनीक्ष्यमाणो मामेवाधिकृत्य प्रव्रजितेन स्मितमादर्शितमिति विनिश्चित्य कुतूहलाक्रान्तमतिस्तमब्रवीत्।

विनयधीरमिदञ्च वपुस्तव स्मितमिदञ्च भदन्त विधार्यसे। चलति बुद्धिरियं पवनाहता वनलतेव किमत्रनुकारण[3] (।) ...

अथ स पार्थिवः सुतरामुपजातविमर्षसम्भ्रमोद्भ्रान्तमानसः पुनरपि तम्भिक्षुं स्मितप्रयोजनम्पर्यपृच्छत्। स च भिक्षुस्तदुपकारक-मतयैव राज्ञः प्रोवाच॥

सूर्यातपो दहति वत्स शरीरकं ते तस्मात् सुखोचितमिदं बहुरोगनीडं। दुः[4].........भितापितानां॥

वस्त्रातपत्रतरुमन्दिरचन्दनाम्बुहारादयस्तदुपघातनिमित्तभूताः। दुःखं त्वनागतमवीचिसमुद्भवन्ते नाशं प्रयास्यति नराधिप कैरुपायैः॥ प्राणोपरोधसमकालमवश्यभावि यत् प्राप्स्यसि त्वमकृत—वहुप्र[5]—। दुःखं यदा क्षणय(?)—त्तव तद्गजभया(?)—हैव हृदय......क्षणेन ॥

कर्मेन्धनः स्फुरित तत्र (?) सदा हुताशो दुर्वृत्तशोणित वसासवपानशौण्डः। यो बान्धवानिव परिष्वजते प्रगाढं ज्वाला भुजैरविरलैः स्वकृतापराधान्।



वीचिम्वदन्ति विवरं न च तत्र काचिद् दुःखस्य वीचिरपि[6] तिर्यगुपर्यधो वा। यस्मादवीचिरिति तेन स सम्प्रसिद्धः शीतस्त (?)......वनो नरकान्तरेषु ॥

यत्र त्वयातिथिजनप्रणयो निषेव्यो ज्वालासखीशतपरिष्वजनोचितेन। स त्वं व्ययामुपगतो रविरश्मितप्तो हाराद् विभेषि न तु घोरविषाद् भुजङ्गात्॥

यस्योत्सङ्गे क्षितितलरजो धूसरस्त्वं[1] निषण्ण......। प्रेम्णा येनाकरुणहृदयो वर्द्धितः पालितश्च तं त्वं हत्वा यदि न पतितस्तत्क्षणञ्चित्रमेतत्॥

वाल्ये लालासलिलमलिनं पाणिना वक्त्रपद्मं येनामृष्टम्विकचकमलच्छेदताम्रोदरेण। त्वाङ्कृत्वाङ्के कृपणभवतः कुञ्चिताः काकपक्षा ये[2] ....।

सत्वं हत्वा पितरमपि हे धार्मिकं धर्म्मराजं कामास्वादव्यसनमदिरापानविक्षिप्तचित्तः। स्वस्थावस्थश्चरसि नरकद्वारशालां प्रविष्टो ज्वालाहस्तैर्न्नरक शिखिन(ः) स्प्रष्टुमिच्छन्ति हि त्वाम्॥

ज्वलदनलशिखावलीपिङ्गलान्तस्थलं सर्व्वतस्तुङ्गनिस्सङ्ग[3] निच्छिद्रलाहादृज(?)लावृतच्छिन्नसम्भिन्न (?) सम्विन्न (?) संकुदितोत्कृष्टनिष्पिष्टनिष्पीडितोत्क्षिप्तलुप्तावलुप्ताश्रयप्राणिसंघाकुलाभीषणं कृपणनरकं यदा यास्यसि प्रेरितो दारुणैः कर्म्मवातै-रनेकोग्रदुःखप्रकर्षातिसन्तापितो दीनकण्ठोरटमूर्ध्ववाहुज्वलच्छ्वलचक्रासिकुन्तप्रहा[4]रव्रणोद्वान्तरक्तोक्षितस्तत्र चाकामकस्सम्वसन्।

ज्वलदनलककपिलमण्डलाकोटरस्तब्धनेत्रैः स्फुरत्कोपरक्तोपसंदष्टदन्तच्छदैरुद्यताप्रायुधैरन्तकाज्ञाकरैस्तिष्ठ तिष्ठेति निर्स्तर्जितो भीतभीतो दिशः प्रेक्षमाणः स्थितोस्मीति कृच्छ्रादभिव्याहरन्या कामवस्थामभिप्राप्स्यसि त्वं धृतो दुष्कृतैः कर्म्म[5]भिर्यदि समनुविचारयेत् तद्भवान्न-नमकींश(?)वस्तेंद्रप्रादोपमा स्युन्निदाघेति तीव्रा अमी भूयते न त्वनभ्याहता यान्ति संवेगमज्झा(?)जनाः प्रायशो दुःखयन्त्रान्तरस्थास्तु शोचन्ति मोघं प्रलापार्तिशोकाभिभूता भृशं ॥

अपि च हे पुत्रक ॥

कान्ताकराग्रविधूतानि मधूनि पीत्वा निश्वाससञ्चि[6](16 b)तदलोत्पलचंद्रिकाणि। संदङ्शयन्त्रविवृतास्यपुटान्तरालस्ताण्य(?ल्व)मुं कथं कथय यास्यसि वह्निवर्णं (?)॥

स्नात्वा त्वं गृहदीर्घिकाम्भसि इसत्पद्मोत्पलालंकृते (।) तीरान्तानत पुष्पपादपलताच्छायासमालिङ्गिते।
क्लिन्नस्विन्ननरास्थिपञ्जरवसानिर्यासपर्याकुले (।) तप्ते वैतरणीजले नि[1]पतितो दुःखात् कदा मोक्ष्यसे॥
प्रासादे शरदभ्रशुभ्रशिखरे पुष्पावलीमण्डिते (।) वीणावेणुमृदङ्गगीतमधुरे संप्राप्य चित्रं सुखं।
नित्यं प्रज्वलितस्फुटानलशिखासन्तानजालाकुलं (।) प्राप्यावीचिमनेकदुःखविहतः किन्नाम कर्त्ता भवान्॥
लज्जामात्रविभूषणां सविनयां चारूपचारां प्रियां (।)[1] दृष्ट्वा प्रीतिविजृम्भमाणनयनो विस्रम्भनिर्यन्त्रणं।
क्रोधप्रज्वलिताक्षिकोशविषमभ्रूभङ्गरौद्रानना (।) नालोक्यान्तर्कर्किकरानभिमुखान् संमोहमायास्यसे॥
श्रीमच्चामरचारुभासुरनरैर्नानाविधैर्वाजिभिः (।) कालिङ्गैश्च विचित्रितोत्तरकुथैर्गन्धोपवाह्यैर्गजैः।
तीव्रक्रोध विषैस्तृकण्व(?)[3]क.... .सप्रतोदनरेन्द्रलक्ष्मीमुपगुह्य पापं कृतं त्वया दुःखशतावसानं।
कृतोर......के विशीर्णचरणो वोढासि दीप्तान् रथान्॥

धृतश्चूडापीडो वकुलकुसुमामोदसुभगस्त्वया मूर्ध्ना येन स्फुरमणिकरालं च मुकुटम्। स्फुरद्वह्निज्वालावलयकपिलञ्च(?:) वक्त्रमशिवं वहन् मूर्ध्ना तेन त्वमनुभविता चापलफलं॥

किञ्च भूयः॥

कले[4]रा.....भवति स्रोवरा (?)ज्जन्म समयमुने (?)——स्य प्राणे प्रियहितसमाधान (?) विदुषः। जगन्नाथे तस्मिन् भगवति भवोपद्रवहरे प्रदुष्टानाङ्का वा भवतु गतिरन्या परमतः॥

उन्मि(?न्मी)लिता इव दिशो दश यस्य दीप्तैः कीर्त्यंशुभिर्घनतमः पटलावनद्धाः। तस्मिन् प्रदोषमुपगच्छति यस्तपस्वी[5]... स्तिरसौ सुहृतः क्षतात्मा॥



यो मातेव पितेव बान्धव इव प्राणिष्वनुक्रोशवानांत्मस्वे(?)हृप्रराङ्मुखेन मनसा जन्माटवीगह्वरे। प्रज्ञावीर्यकृपाभ्युपायसचिवः क्लेशैर्न नाकम्पितः प्राप्तो बोधिमनुत्तरां सभगवान् कां सत्क्रियां नार्हति॥

जगद्धिताधानविधानदीक्षास्वभावशास्तानृश[6] (17 a)——हा——:। मनः प्रसादायतनेपि तस्मिन् कथं नु चित्तानि विदूषयन्ति॥

असज्जनसमागमस्य कटुकावसानं फलं नरेन्द्र समुपार्जितन्तदधुना तवापायिकं। इदं समनुचिन्त्य साधुजनसङ्गमस्सेव्यतान्ततस्तव भविष्यति व्यसनपंजरान्निर्गमः॥

एवं गतेपि क्रियतां प्रयत्नः पा[1]——हाणे कुशलोदये च। अप्येव नाम व्यसनांबुराशेः(?) स्यात् तेवसान नरलोकपाल॥
अनेकरूपव्यसनोपमृष्टां समुद्रवेलांजललोलशीलाम्। नरेन्द्रलक्ष्मीमुपगुह्य पापं कृतं त्वया दुःखशतावसानं।
बहुप्रकारात्ययदारुणेषु विचार्यमाणाल्पसुखोदयेषु। विषह्य का[2]——मनस्त्वयात्मा स्वयं कृतो दुर्गतिदुःखसाक्षी॥
अभिसन्धिकृतस्य कर्म्मणो न हि नाशं प्रवदन्ति सूरयः। अपि कल्प सहस्रकोटिभिः फलदन्तन्नियमेन जायते॥
अत एव जगौ जगद्वरो जगदालोककरः कृपामयः। भगवान् भवभोगनिस्पृहः स हि कर्म्मस्वकतां शरीरिणां[3](॥)
सलिलानिलराजतस्करैर्धनमत्रैव विलुप्यते नृणां। प्रभवन्ति तु तेन कर्मणा स्वमत(?)कर्म्म नृणां शुभाशुभं॥
परिवर्त्तिनि निश्चलेक्षणः क्षणमात्र प्रतिबद्धजीवितः। मरणाभिमुखो यदा नरो ननु कर्म्मैव तदा परायणं॥
स्वजनो जनवन्निवर्त्तने(?)गृहवित्ताद्यपरैर्विलुप्यते।[4]——कृतं त्वनुयाति देहिनां भवसंक्रान्त्यनुकूलवर्त्तिनां॥
अपि च हे महाराज॥

मरणवशगतस्य जन्तोर्विवृद्धोल्वणश्वासशुष्कौष्ठ कण्ठस्य हिक्का प्रवेशानुबन्धाद् विनिर्धूयमानो रसः (।) कलविकलपदाक्षरे भाषिते विह्वले चक्षुषि च्छिद्यमानेषु मर्म्मस्वनामन्त्र्य रोषादेव प्रस्थि[5]——पुभिः। महति शिथिलतां गते सन्धिसंघातयंत्रे रुजा तीक्ष्णसूची निपातान्तरे क्वापि गन्तुं कृताभ्युद्यमे जीविते तिमिरगहनसङ्कटन्निर्जनं मार्गमाक्रामतो नास्ति पुण्यादृते कश्चिदन्यः सखातः प्रयत्नं कुरु श्रेयसि॥

अपि च महाराज॥

अवश्यं त्यक्तव्यः परमदयितो बान्ध[6] (17 b) (ज)नः प्रवेष्टव्यं घोरं सभयमसहायेन गहनं। प्रवासे वस्तव्यं सुचिरमपि चा संस्तुतजने तदस्मात् कर्त्तव्यम्बहुकुशलपाथेयमसकृत् ॥

अथ स राजा तेन भिक्षुणा तथा संवेजितो यथा क्षणेनोपलब्धकुशलमूलोपचयाभिलाषस्तीव्रभयविषादव्याकुलमानसश्च प्रोवाच ॥[1]

(अ)धुना करवाणि भदन्त हे वद वदास्ति दया यदि ते मयि। निपतितं महति व्यसनार्ण्णवे कृपणकं कृपयोद्धर मां यते ॥

जलदमारुतचन्दनशीतलैरपि वयं वचनैस्तव तापिताः। स्वकृतदुष्कृतशंकुशतक्षता विशयलौल्यपराजितमानसाः ॥

विपरिणामकटूनि मया पुरा वि[2](ष)यसङ्ग सुखान्यकृतात्मनां(?)। समुपगुह्य कृतं बहुदुष्कृतं दहति यन्मम संप्रति मानसं ॥

विधिगपरविम(?)षं विषयाश्रयं सुखमनार्यनिषेवितमध्रुवं। यदुपगम्य नरा विषयद्विषामिह भवन्ति सदा करुणास्पदं ॥

अविनयोनुगतो मृदितं यशो न गणितं कुलमायपतिरुज्झि[3](तं।)....कलुषं विवृतो नयो विषय लौल्य—यागया ॥

असदृशं जनसंगत्याभ्या स(?)दोषान्मयैव प्रकृतिगुणविनाशो मन्दभाग्यस्य जातः। शठमतिभिरनार्यैर्व्विप्रलब्धोस्मि वाक्यैर्यदिह गुणधनानां शोचनीयोस्मि जातः ॥

प्रकृति रुचिर वृत्तिः साधवो नानुवृत्ताः सुच[4]—मानां वाङ्म(?)धूनान्निमित्तं। यदनयगहनान्तर्व्वर्त्तिना—व्यसनशरशतानां लक्ष्यतामागतोहं ॥

विषयसुखलवाशापाश मामुच्य चित्ते तृणलवमिव जीर्ण्णं प्रोज्झ्य सद्वृत्तवन्तम्। परिणतिविरसानां कर्म्मणामात्मनैव क्षितिधर इव तुङ्गा राशयः संविभा[5]...... (यो)पि मान्व(?)क्ष्यति प्रोद्‌ब्रताक—लालपिङ्गल शिखो वह्निः कथं नारकः। पापात्मा मृत एव नाम सततं योन्योपि वास्मद्विधेः (।) मृत्युःकिमृतमारिकामकरुणः कर्त्तुं व्यवस्येन्मयि ॥

दिक्संमोहमुपागतोहमधुना गच्छामि काम्वा दिशम् (।)मज्जा[6] (18 a) मीव भदन्त शोकसरसि व्या.....पूर्वः।

शैलोयं स्फुटतीव पापचरितं मामद्य सन्धारयं(?यन्) (।)युष्मत्पादसमाश्रयात्तु शतधा न त्वेव याति ध्रुवं ॥



16 त्रिदण्डमाला[1] अश्वघोष कुटिला $22 \times 1\frac{3}{4}$ 115 5 Leaf 107 missing

यत्रैको[1]प्यकृतावयामन(:) प्रदोषः संसारव्यसनशतैस्तनोति कृत्स्नं। तत्रैकः कथमपि चेतसः प्रसादो नोच्छिन्द्याद् व्यसन सहस्रतन्तुजालं ॥

यं गत्वा शरणमहं जगत्प्रदीपं सर्व्वासच्चरितविरोधिनीम्प्रपन्नः। आर्याणां नयपदवीं समन्तभद्रान्तम्वन्दे कृपणजनाधिकानु[2]कम्पम् ॥

इत्युक्त्वा व्यसनपराङ्मुख(?): स राजा संबुद्धे भगवति निश्चलप्रसादः (।)तं भिक्षुं क्षितितलग्नमौलिमूर्ध्ना वन्दित्वा स्वपुरवरोन्मुखो जगाम ॥

संबुद्धे प्रतिलब्धवान्नरपतिः श्रद्धामसौ तादृशीं (।) यत् कर्म्मावरणाद्रिजालमकरोदल्पावशेषाश्रयम्।

पापं[3]यत् क्रियते जिने व्रजति तत्तैरकार्यं(?): क्षय—केणैव हि शक्यते विलिखितुं वज्रस्वभावो(क्ष)ह्ययं ॥

अप्येव क्रकचैर्निशातदशनच्छेदावलीदन्तुरैस्तस्याज्ञा प्रविचार्यमानतनुभिः कार्यैव शास्तुर्भवेत्। यस्मात्तद्विमुखा विशन्ति नरकां(?कान्) ज्वालावलीदारुणां(?णान्।) तस्याज्ञा प्रवर्ण[4]....न ते सुखं संप्राप्यते शाश्वतं ॥

स्वाभिप्रायमतो ब्रवीमि सकलं संसारमप्युत्सहे(।)वस्तुं भीमभयानकेपि नरके लोके जिनालंकृते (।) नत्वेवैकमपि क्षणं सुरपुरे संबुद्धशून्ये जगत्युद्वृत्तक्षतवृत्तराक्षसगणव्यालुप्तपुण्योत्सवे ॥

तद्यावन्न पतति सर्व्व एव लोको दुर्दृष्टि[5]—तवितते प्रमादकूपे। सर्व्वज्ञप्रवचनभास्करे गतेस्तं तत्तावद् वचनरसायनं निषेव्यं ॥

सर्व्वज्ञे परमगुरौ निवेश्य भक्तिं श्रोतव्यम्वचनमृषे (:) समन्त शोभिः (?)। निक्षिप्य व्यसनमयीङ्कुकार्यचिन्तां नातोन्यत्परमधिकं यतोस्ति कृत्यं ॥

श्रवण करकः कोर्थस्तेषामसच्छ[6]

[1]On the front page—"त्रिदण्डकमालेयं" in Sanskrit, and "Rgyud-3-gyi-phreṅ-ba" and

अथ स महात्मा तं राजानं सम्विग्नमानसं ऽ (?अ) वेत्य पात्रमयं श्रेयस इति विनिर्धार्योवाच ॥

तेन हि महाराज तमेव भगवन्तं विनि[1]पात—जन विलंब(?) वत्सलम पा—त्यक्तसकलसत्वधातुमखिलजगद्धिताधानाम्लान-प्रयोगमपरिमितविशुद्धोदारातिशयगुणगणरत्ना(?)धिवासं महाकारुणिकं सर्वज्ञं सर्व्वदर्शनं शाक्यमुनिं शरणमुपेहि ॥ तत एव ते दुःखपरंपरापर्यन्तो भविष्यति[2]...(।)

सुक्षेत्रे बीजमुप्तं भवति बहुफलं तिक्त मास्य प्रि(?)म्वा (।)क्षेत्रस्यासौ स्वभावो भवति समगुणः सर्व्वसस्यप्रसूतौ ॥

एवंकारापकारा भगवति तनवोप्याहिताः पापकाले पर्यन्त(ं)नाप्नुवन्ति व्युपरतसकलक्लेशसन्तानकाले ॥

अथ स भूपतिः प्रविजृम्भमा[3]णकुशलमूलोपचयाभिलाषमृदुहृदयतया बुद्धे भगवति समुत्पन्नप्रेम गौग़(?र)व प्रसादबहुमानः संप्रत्ययाश्रुसलिलशाष्पाविलदीनमृदुमुकुलितनयनयुगलवदनस्तं भिक्षुमुदीक्षमाणो वाष्पगण्डूषोपरुध्यमानकषायकण्ठो धरणितलप्रति[4]ष्ठित-जानुमण्डलः (कृ)तकरपुट इत्युवाच ॥

एषोहं तमृषिं व्रजामि शरणं प्राणैरपि प्राणिनां (।) एकं बान्धवमेकमेव सुहृदं शास्तारमेकं परं ।

त्राणं त्रैभुवनार्त्तिगह्वरदरीव्यावर्त्तिनां प्राणिनां (।) आचार्यम्परमार्थतत्वविषये भूतार्थनाथं विभुं ॥

पुनःपुन[5]रनुत्तरं पुरुषदम्यसत्सारथिम्प्रयामि शरणं शरण्यतममप्यहं मज्ज(?)भिः। अचिन्त्य चरितं तमेव भगवन्तमद्य कृतप्रपञ्च-विषबीजनिर्म्मलनिरुत्तराध्याशयं ॥

अप्यस्थिभि(:)स्थितिमतां शरणं प्रपद्ये लोकोपकारकरणंकरस(?)स्वभावं। बुद्धं तमेव शतधा च सहस्रधा चा[6](18 b)—मकरालयकर्ण्णधारं।

मन्ये पूतमिवात्मभावमधुना शास्तुः प्रणामोद्भवैः(।) पुण्याम्भोभिरखण्डमण्डलशशिज्योत्स्नावलीनिर्म्मलैः।

कोवा तं प्रणिपत्य सान्द्रकरुणाप्रह्लादिताध्याशयम् (।) तीव्रापायवतीं विषादमकरान्तीर्ण्णो न दुःखापगाम् ॥



"Rgyud-phyag-3- paḥi-phreṅ-ba" It begins—"नमोरत्नत्रयाय॥ यस्येदं सकलामलेन्दुकिरणप्रख्यैर्यशोभिर्जगद् व्याप्तं यश्च महाकृपापखशश्चक्रे हितं देहिनां।

वीर्योत्कर्षवशान्न दुष्करशतैः खिन्नो जगद्भूतये यो युक्तो विनिवृत्तदोषगहनो बुद्धाय तस्मै नमः ॥

यं संप्राप्तवतो मनोनधिकृतिं संप्रापयन्त्यापदो नोत्सेकं जनयन्त्यनल्पविभवाः संपत्तयः[1]श्रीकराः।

लोकस्य व्यसनक्षयाय मुनिना योबोधि बुद्धः स्वयं तं धर्म्मं प्रणतोस्मि जन्ममरणव्यापत्प्रयञ्चक्षयं ॥

व्याडाक्रान्तलता वितानगत(?ह)नच्छायोपमान् ये भवान् विज्ञाय प्रयता भवक्षयविधौ क्षीणास्रवा ये च तान्। साधूत्सङ्गि(?गि)रजस्रमर्च्यचरणान् वृत्तान् विनीताशयान् वन्दे वन्द्यतमान् प्रकीर्णयशसः शि[2]ष्यान् मुनेस्तायिनः॥ ...(p.2a)एतद्भुक्तितया प्रणाम्य शिरसा रत्नत्रयं भावतः। कौण्डिन्यप्रभृतींश्च सूत्रविनयव्याख्यानशोभाकरान्॥ वक्ष्ये सूत्रमहं यथाविभवतः सर्वज्ञवक्त्रोद्भवं। तन्मे साधुजनः शृणोतु मुदितः क्लेशक्षयायोद्यत इति॥ एवम्मया श्रुतमेकस्मिन् समये भगवान् छ्रावस्त्यां[1] विहरतिस्म जेतवनेऽनाथ पिण्डदस्यारामे (।) तत्र भगवान् भिक्षूनामन्त्रयते स्म ॥ यं यूयं भिक्षवोऽनुकम्प्यध्वं। यं करुणायतयश्च(?)वो वचनं श्रद्धया श्रोतव्यं कर्त्तव्यम्मन्येत्र (?त्)। तं यूयं भिक्षवश्चतुरु(?)र्ष्ववेत्य प्रसादेषु समादापयत विनयत निवेशयत प्रतिष्ठापयत। कतमेषु चतुर्षु[4]बुद्धेवेत्यप्रसादे समादापयत विनयत निवेशयत प्रतिष्ठापयत। धर्म्मे संघे आर्यकान्तेषु शीलेषु समादापयत विनयत निवेशयत प्रतिष्ठापयत। तत् कस्य हेतोः (।) स्यात् खलु भिक्षवश्चतुर्ण्णां महाभूतानामन्यथात्वं तद्यथा पृथिवीधातोरब्धातोस्तेजोधातोर्व्वायुधातोर्नत्वेव श्रुतवत् आर्य[5] (p. 2b)श्रावकस्य ० स्यादन्यथात्वं....(p 2b)....इदमवोचद् भगवानात्तमनसस्ते च भिक्षवो भगवतो भाषितमभ्यनन्दन्॥

यथा महान्तो विपुला नभ आसाद्य पर्व्वताः (।) समन्तादनुसंयांति निष्पिषन्तो वसुन्धरां ॥

न तत्र हस्ति[3]नां भूमिर्न पत्तिरथवाजिनां। न चापि मन्त्रयुद्धेन जयोलभ्यो बलेन वा ॥

एवं जरा च मृत्युश्च मनुष्यानभिमर्दति। क्षत्रियान् ब्राह्मणान् वैश्यां शूद्रांश्चण्डालपुक्कसान् ॥

दुःशीलां शीलयुक्तांश्च गृहस्थान् व्रतिनस्तथा। दह्रांश्चैव(।)ति(?) वृद्धा(न्) तथा मध्यमपूरुषान् ॥

2 7 परिकथा[1] " " 57 " complete

अभिमर्द्दति सर्वां हि न किंचिदनुरक्षति । तस्माद्धि पण्डितः[4]पोषः संपश्यन्नर्थमात्मनः ।
बुद्धे निवेशयेच्छ्रद्धान्धर्म्मे स(ङ्)घेप्यनुत्तरे ॥ स धर्म्मचारी कायेन वाचा चाप्यथ चेतसा ।
इह चानिन्दितो जन्तुः प्रेत्य स्वर्गे च मोदते ॥ यावद्वैदूर्यनीलशशिकरखचितं व्योमतारार्कचित्रं यावद्वीचीतरङ्गप्रचलित-मकरक्षोभिताम्बुः समुद्रः । यावद्भूर्भूतधात्रीनगनगरनदी[5] (3 a) वृक्षगुल्मोरुवप्रास्तावन्मारावभेत्तुस्त्रिभुवनमहितं शासनं जाज्वलीतु ॥
यानीह भूतानि समागतानि स्थितानि भूमावथवान्तरीक्षे । कुर्व्वन्तु मैत्रीं सततं प्रजासु दिवा च रात्रौ च चरंतु धर्म्मं ॥"

It ends (p 116 a) "बुद्धेन बोधिं परमामवाप्य ये स्थापिताः सूत्रमयाः प्रदीपाः (।) ते नित्यमज्ञानतमांसि भित्वा लोकेषु निष्कम्प-शिखा ज्वलन्तु ॥

ज्वलतु चिरं धर्मोल्काया चिरपरिनिर्वृतेपि लोकगुरौ । अज्ञानतिमिर[1]मथनी समविषमं संप्रकाशयति ॥
स्वस्ति रात्रौ स्वस्ति दिवा स्वस्ति मध्यन्दिने स्थिते । सर्व्वत्र स्वस्ति वो भवतु मा कश्चित् पापमागमत् ॥
सर्व्वे सत्त्वाः सर्वे प्राणाः सर्वे भूताश्च केवलाः (।) सर्व्वे वै सुखिनः सन्तु सर्व्वे सन्तु निरामयाः (॥)
सर्व्वे भद्राणि पश्यन्तु मा कश्चित् पापमागमत् ॥ल्ह॥

ये भ्यागता इह[2] सुरासुरनागयक्षगन्धर्व्वकिन्नरनराः श्रवणाय धर्म्मं । रक्षन्तु ते जगदिदं जिनशासनञ्च धर्म्मम्मुनीन्द्रकथितं च चरन्तु नित्यं ॥ ॥ शीलचन्दनलिप्ताङ्गा ध्यानप्रावरणावृता(ः) बोध्यङ्गकुसुमाकीर्णा विहरध्वं ॥ यथासुखं ॥ समाप्ता चेयं त्रिदण्डमाला(।) कृतिराचार्यस्थविराश्वघोष[3]स्य शाक्यभिक्षोः सर्व्वास्तिवादिनो महावादिनः ॥ये धर्म्मा......॥"

[1] It begins—"नमो बुद्धाय ॥ अबन्ध्य सद्धर्म्मकथायशास्त्रे नमस्तदुक्ताय च शाश(?स) नाय । जिनप्रसं(?शं)सा-कुसुमार्च्चिताय संघाय चाष्टोत्तमपुद्गलाय ॥



निक्षिप्याक्षिप्य च यथा सूत्रं धर्म्मकथोद्यतः । युक्तः परिकथां कर्त्तुं कथेदं सम्प्रवक्ष्यते ॥
कामं लक्षणतः प्रोक्तः पूर्व्वाचार्येरयं विधिः । तावतातु न सर्व्वः[1]स्यात् कर्त्तुं परिकथां प्रभुः ॥
य(ः)त्वधीत्यैव शक्तः स्यात् पर्षच्चित्तकल्पतां । समाधातुम् कृच्छ्रेण तन्मया रचयिष्यते ॥
लब्धप्रसादास्वादा हि परिषत्कथया यया । पात्रीभवति धर्म्मस्य प्रशमस्तिमितोन्मुखी ॥......
लोकालो[2]ककरस्यैवं देशनासंप्रतिग्रहौ । धर्म्मस्य स्थितये स्यातामतश्चायं ममादरः ॥
धर्म्मः परमसूक्ष्मोयमप्रसन्नेन चेतसा । चक्षुषा कलुषेणेव रूपतत्वन्न लक्ष्यते ॥
प्रसन्नेषु तु चित्तेषु शारदेषु सरस्स्विव । धर्म्मज्योत्स्ना भवत्येव श्रेयः कुमुदबोधनी ॥

अतः प्रसादसंवेगहर्षणादिप्रयोजना[3]ः । वक्ष्ये परिकथाश्चित्राः शरणादिसमाश्रयाः ॥......तत्र शरणगमनविशेषणार्थमेवं परिकथा प्रस्तोतव्या ॥[4]

सुदृष्टं वत पश्यामि कलावपि युगे सति । सद्धर्म्मावहितश्रोत्रान् स्वार्थमाशंसतः सतः ॥
कुकार्यपर्याकुलमानसेस्मिन् प्रायेण लोके स्वहितप्रमत्ते । धर्म्मार्थमुत्सृष्टकुकार्यसङ्गैर्भवद्भि रुद्भावितमार्य्यवृत्तं ॥

न गणितं वालजनानुवृत्तं लोकवृत्तं व्यवधूतः कौसीद्य पाप्मा । दर्शितं गुणाभिमुख्यं । आवि[5](2 a) ष्कृता कुशलान्वेषणपटुता । सूचितः कल्याणाभ्यासविशेषः । विनयमार्ग्गानुवृत्त्या कथितमाभिजात्यं । न्यायाभिनिवेशात् प्रकाशिता बुद्धिसंपत् । धर्म्मार्थम(?)धिगमात् सुकृतः सद्धर्म्मः । सुभाषिताभिलाषानुगणितः शरीरपरिखेदः । श्रुतेनातृप्त्या दर्शिता विद्वत्प्रकृतिः । तदेवंगुणां श्रेयोर्थम[1]भिगतां पर्षदं को नाम धर्म्मातिथ्येन न प्रतिपूजयेदतश्च ब्रूमहे ।" Some of the other Parikathās are—"दानपरिकथा (p. 9 a)", "मान्या—भिहारपरिकथा(p. 21 a)", "शीलपरिकथा(p. 22 b)", "पोषधपरिकथा (p.29 b)", "प्राणातिपातविरतौ परिकथा(p. 29 b)", "अदत्तादानविरतौ (p. 30 b)", "वाग्दुश्चरितविरतये परिकथा (p. 32 a)", "मद्यपानविरतये (p. 33 b)", "परसमयदर्शनार्थं

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| III | 1 | 8 | मध्यान्तविभागकारिका[1] | मैत्रेयनाथ | मागधी | $8\frac{1}{4}\times 2\frac{1}{4}$ | 8 | 7 | Complete |

तद्भक्तजनानुग्रहाय परिकथा (p. 36 b)"; "तथागतप्रतिमाचित्रयितुः संहर्षणार्थं परिकथा (p. 42 a b)", "स्तूपसत्काराधिकारे (p. 45 b)", "अपशब्द ... परिकथा (p. 46 a)", "शोकविनोदनार्थं ... परिकथा (p. 49 a)", "द्यूतादीनवप्रदर्शने (p. 53 a)", "तीर्थाभिषेकपरीक्षा (p. 54 a)", "अग्निप्रवेशादि धर्म्मपरीक्षा (p. 55 b)", It ends—(p. 57 a)—"अनस्(?श) नमपि देहं कर्षयन्नेव पापं शुभमपि च बुभुक्षा भ्रान्तचित्तस्य किं स्यात्। इति तदपथमेव स्वर्ग्गमार्ग्गस्य विद्यादशनविकलभावाद् द्यां मृता वा व्रजन्ति ॥

अनशनाच्च यदि त्रिदिवं व्रजेत्[1]क इह नेह जनस्त्रिदिवं व्रजेत्। बहुदिनश्च निशाश्च न भुज्यते व्रजतु तेन जनस्त्रिदशालयं ॥

अथ न तेन परैति सुरालयं ननु दिवो गमने तदकारणं। अनभिसंधिकृतादपि कर्म्मणः शुभमुदेति फलं शुभसात्मकं ॥ .... [2]

भवेच्च धर्म्मस्य यदीदृशः क्रमो भवेदधर्म्मस्य नु कीदृशः क्रमः। अतो न धर्म्मोऽनशनेन कस्यचिन्न वाप्यधर्म्मोस्त्यशनेन कस्यचित् ॥

विवर्जयन्नप्यशनानि पापभाग् न सत्वहिन्सादि विवर्जयेद् यदि। अवर्जयन्नप्यशनानि पुण्यभाग् भवेन्न हि[3]न्सादि विवर्जयेद् यदि ॥

धर्म्मप्रसिद्धिरिति नानशनेन काचित् पापक्षयो न च तपस्तदतः कथं स्यात्। क्षान्तिस्तु दोषतपनाच्छुभया च दीप्त्या श्रीमत्तपस्तदिति साधु भजेत् तपोर्थी ॥

स्यादत्र यद्यनशनेन न धर्म्मसिद्धिः कस्मान्मुनेः सुतगणो न विकालभोजी।

अत्रोच्यते गुणविशेषपरिग्रहार्थं किं[4]चिद् विकालविगतेपि जिनोनुजज्ञे ॥

इति नानशनं यतः परीक्षां सहते तेन न तत् तपो न धर्म्मः। नियेमन समाददीत तस्माच्छुचि शीलादि तपः प्रसिद्धिकाम इति ॥ ०÷० ॥श्रीः॥ ॥[5]"

[1] Paper Ms. On the first extra title page—"ya-tse-bas-phul-bahi (=presented by ya-tse-ba) Mṅon-rtog-rgyan, Chos-chos-ñid-rnam-ḥbyed, Dbus-su-mthaḥrnam bṣhugs." On the second



| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| 2 | 363 | धर्मधमंताप्रविभागसूत्र[1] | " | " | " | 5 | " | " | |
| 3 | 9 | अभिसमयालंकार[2] | " | " | " | 20 | " | " | |

extra title page—"मैत्रेयकारिका" In the end of मध्यान्तविभाग—"मध्यान्त विभागे आनुत्तर्यपरिच्छेदः पञ्चमः ॥ ॥ आर्यमैत्रेयकृतमध्याविभागमहायानशास्त्रकारिकाः समाप्ताः ॥ "(p. 8 b)"

[1] It begins (p. 9 a)—

"किञ्चित् परिज्ञाय यतः प्रहेयं साक्षाच्च किञ्चित् करणीयमन्यत्। अतस्तयोर्लक्षणताविभागं चि[1]कीर्षता शास्त्रमिदं प्रणीतं ॥ द्वयमिदं सर्वं। धर्म्मताधर्म्मतासंग्रहात्। धर्म्मप्रभावितः संसारः। धर्म्मताप्रभावि[2]तं यानत्रयनिर्वाणं।" It ends (p. 13 a)—"धर्म्मासत्प्रख्याने उदाहरणं मायास्वप्नादि (।) आश्रयपरिवृत्तौ वुदाहरणमाकाश[5]सुवर्ण्णवार्यादि ॥ ॥ धर्म्मधर्म्मतासूत्राण्यार्य मै त्रे य-पादस्य ॥ धर्म्मधर्म्मताप्रविभागसूत्रं समाप्तम्।[6] ..."

[2] In the colophon—"समाप्तमिदमभिसमयालङ्कारारख्यं प्रज्ञापारमितोपदेशशास्त्रं ॥ ॥ कृतिर्भगवत आर्यमैत्रेयस्येति ॥...॥ संवत्१३७० (vik?=1313 A.C.) फाल्गुनवदि २ सनि दिने ॥ सुरक्षेत्रे ॥ राजराजेश्वरलोकेश्वरश्री-रिपुमल्लदेवराज्ये ॥ तस्मिन् काले वर्त्तमाने ॥ सकलप्रक्रियाम्वि(?)राजम्बगुरोः श्रीपण्डितमुञ्जश्रीस्या(?)र्थे ॥ श्री वास्तव्यान्वये पं। श्री जीवधरेणालेखि ॥..."